पर्य्यादपेतमर्य्यादाः स्त्रियस्तिष्ठन्ति भर्त्तृषु ॥”
इति गारुडे । ११५ । ५८—५९ ; ६२—६५॥
स्त्रियो धन्या यथा,—
“योषितः साधु धन्यास्तास्ताभ्यो धन्यतरोऽस्ति कः ॥”
इत्युपक्रम्य ।
“कलिः साध्विति यत् प्रोक्तं शूद्रः साध्विति योषितः ।
तत्राह भगवान् साधुर्धन्याश्चेति पुनः पुनः ॥
तत् सर्व्वं श्रोतुमिच्छामो न चेद्‌गुह्यं महामुने ।
इत्युक्तो मुनिभिर्व्यासः प्रहस्येदमथाब्रवीत् ॥
योषिच्छुश्रूषणं भर्त्तुः कर्म्मणा मनसा गिरा ।
कुर्व्वती समवाप्नोति तत्सालोक्यं ततो द्विजाः ॥
नातिक्लेशेन महता तानेव पुरुषो यथा ।
तृतीयं व्याहृतं तेन मया साध्विति योषिताम् ॥”
इति विष्णुपुराणे । ६ । २ । ८२—८३ ॥
वेश्यास्त्रीणां धर्म्मो यथा,—
श्रीकृष्णमहिष्य ऊचुः ।
वेश्यानामपि यो धर्म्मस्तन्नो ब्रूहि तपोधन ।
दाल्भ्य उवाच ।
यः कश्चित् शुल्कमादाय गृहमेष्यति वः सदा ।
निश्छद्मनैवोपचर्य्यः स तदान्यत्र दाम्भिकात् ॥
देवतानां पितृणाञ्च पुण्याहे समुपस्थिते ।
गोभूहिरण्यदानानि प्रदेयानि च शक्तितः ॥
ब्राह्मणेभ्यो वरारोहाः कार्य्याणि वचनानि च ।
यच्चाप्यन्यद्व्रतं सम्यगुपदेक्ष्यामि तत्त्वतः ॥
अविचारेण सर्व्वाभिरनुष्ठेयन्तु तत् पुनः ।
संसारोत्तारणायालमेतद्वेदविदो विदुः ॥
यदा सूर्य्यदिने हस्तः पुष्यो वाथ पुनर्व्वसुः ।
भवेत् सर्व्वौषधिस्नानं सम्यङ्‌नारी समाचरेत् ।
तदा पञ्चशरस्याथ सन्निधानत्वमेष्यति ॥
अर्च्चयेत् पुण्डरीकाक्षमनङ्गस्यानुकीर्त्तनैः ।
कामाय पादौ संपूज्य जङ्घे वै मोहकारिणे ॥
मेढ्रं कन्दर्पनिधये कटिं प्रीतिमते नमः ।
नाभिं सौख्यसमुद्राय रामाय च तथोदरम् ॥
हृदयं हृदयेशाय स्तनावाह्लादकारिणे ।
उत्कण्ठायेति वै कण्ठमास्यमानन्दकारिणे ॥
वामांसं पुष्पचापाय पुष्पबाणाय दक्षिणम् ।
नमोऽनङ्गाय वै मौलिं विलोलायेति च ध्वजम् ।
सर्व्वात्मने शिरस्तद्वद्देवदेवस्य पूजयेत् ।
नमः शिवाय शान्ताय पाशाङ्कुशधराय च ॥
गदिने पीतवस्त्राय शङ्खचक्रधराय च ॥
नमो नारायणायेति कामदेवात्मने नमः
नमः शान्त्यै नमः प्रीत्यै नमो रत्यै श्रियै नमः ।
नमः पुष्ट्यै नमस्तुष्ट्यै नमः सर्व्वार्थसम्पदे ॥
एवं संपूज्य गोविन्दमनङ्गात्मानमीश्वरम् ।
गन्धैर्म्माल्यैस्तथा धूपैर्नैवेद्येन च भामिनी ॥
तत आहूय धर्म्मज्ञं ब्राह्मणं वेदपारगम् ।
अव्यङ्गावयवं पूज्य गन्धपुष्पार्च्चनादिभिः ॥
शालेयतण्डुलप्रस्थं घृतपात्रेण संयुतम् ।
तस्मै विप्राय सा दद्यान्माधवः प्रीयतामिति ॥
यथेष्टाहारयुक्तं वै तमेव द्विजसत्तमम् ।
रत्यर्थं कामदेवोऽयमिति चित्तेन धार्य्यताम् ॥
यद्यदिच्छति विप्रेन्द्रस्तत्तत् कुर्य्यात् विलासिनी ।
एवमादित्यवारेण सदा तद्व्रतमाचरेत् ।
तण्डुलप्रस्थदानञ्च यावन्मासांस्त्रयोदश ॥
ततस्त्रयोदशे मासि सम्प्राप्ते तस्य भाविनी ।
विप्रस्योपकरैर्युक्तां शय्यां दद्याद्विलक्षणाम् ।
सोपधानकविश्रामां स्वास्तरावरणां शुभाम् ॥
दीपिकोपानहच्छत्रं पादुकासनसंयुताम् ।
सपत्नीकमलङ्कृत्य हेमसूत्राङ्गुलीयकैः ॥
सूक्ष्मवस्त्रैः सकटकैर्धूपमाल्यानुलेपनैः ।
कामदेवं सपत्नीकं गुड़कुम्भोपरि स्थितम् ॥
ताम्रपात्रासनगतं हैमं नेत्रपटावृतम् ।
सकांस्यभाजनोपेतमिक्षुदण्डसमन्वितम् ।
दद्यादेतेन मन्त्रेण तथैकां गां पयस्विनीम् ॥
यथान्तरं न पश्यामि कामकेशवयोः सदा ।
तथैव सर्व्वकामाप्तिरस्तु विष्णो सदा मम ॥
यथा न कामिनी देहात् प्रयाति तव केशव ।
तथा ममापि देवेश शरीरे त्वं कुरु प्रभो ॥
तथा च काञ्चनं देवं प्रतिगृह्य द्विजोत्तमः ।
कोऽदात् कस्मा अदादिति वैदिकं मन्त्रमीरयेत् ॥
ततः प्रदक्षिणीकृत्य विसर्ज्ज्य द्विजसत्तमम् ।
शय्यासनादिकं सर्व्वं ब्राह्मणस्य गृहं नयेत् ॥
ततः प्रभृति योऽन्योऽपि रत्यर्थं गेहमागतः ।
सामान्यं सूर्य्यवारे च स संपूज्यो भवेत्तदा ॥
एवं त्रयोदशं यावत् मासमिकं द्विजोत्तमम् ।
तर्पयेत यथाकालं प्रोषितेऽन्यं समाचरेत् ॥
तदनुज्ञारूपवन्तं यावदस्यागमो भवेत् ।
आत्मनोऽपि तथा विघ्नं गर्भसूतकराजसम् ॥
दैवं वा मानुषं वा स्यादुपरागेण वा ततः ।
साचारानिष्टयशसो यथाशक्त्या समाचरेत् ॥
एतद्वः कथितं सम्यग्भवतीनां विशेषतः ।
स्वधर्म्मोऽयं यतो भार्य्या वेश्यानामिह सर्व्वदा ॥
पुरुहूतेन यत् प्रोक्तं दानवेषु पुरा मया ।
तदिदं साम्प्रतं सर्व्वं भवतीष्वपि युज्यते ॥
सर्व्वपापप्रशमनमनन्तफलदायकम् ।
कल्याणिनीनां कथितं कुरुध्वञ्च वरानना ॥
करोति याशेषमखण्डमेतत्
कल्याणिनी माधवलोकसंस्था ।
सा पूजिता देवगणैरशेषै-
रानन्दकृत् स्थानमुपैति विष्णोः ॥
तपोधनः सोऽप्यभिधाय चेत-
दनङ्गदानव्रतमङ्गनानाम् ।
स्वस्थानमेष्यत्यनु ताः समस्त-
मित्थं करिष्यन्ति च वेदयोनेः ॥”
इति मत्स्यपुराणेऽनङ्गदानव्रतम् । ७० । ३०—६४
स्त्रीरोगनाशकौषधं यथा,—
हरिरुवाच ।
“एकं पुनर्नवामूलं अपामार्गस्य वा शिव ।
सरसं योनिविक्षिप्तं वराङ्गस्य व्यथां हरेत् ॥
प्रसूतिवेदनाञ्चैव तरुणीनां व्यथां हरेत् ॥
भूमिकुष्माण्डमूलं वै शालितण्डुलवारिणा ।
समाहं दुग्धपीतं स्यात् स्त्रीणां बहुपयस्करम् ॥
रुद्रेन्द्रवारुणीमूललेपात् स्त्रीस्तनवेदना ।
नश्येत् घृतविपक्वा च कार्य्यावल्यन्तु पालिका ।
भक्षिता सा महेशान योनिशूलं विनाशयेत् ॥
प्रलेपिता कारवेल्लमूलेनैव विनिर्गता ।
योनिः प्रवेशमायाति नात्र कार्य्या विचारणा ॥
नीलीपटोलमूलानि साज्यानि तिलवारिणा ।
पिष्टान्येषां प्रलेपो वै ज्वालागर्भगरोगनुत् ॥
पाठामूलं रुद्रपीतं पिष्टं तण्डुलवारिणा ।
पापरोगहरं स्याच्च कुष्ठपानन्तथैव च ॥
वाप्योदकञ्च समधु पीतमन्तर्गतस्य वै ।
पापरोगस्य सन्तापनिर्वृत्तिं कुरुते शिव ॥
कदलीलिकुचं पीतं पिष्ट्वा तण्डुलवारिणा ।
स्त्रीणाञ्चैव महादेव रक्तस्रावं हि वारयेत् ॥
घृततुल्या रुद्र लाक्षा पीता क्षीरेण वै सह ।
प्रदरं हरते रोगं नात्र कार्य्या विचारणा ॥
द्विजयष्टीत्रिकटुकं चूर्णं पीतं हरेच्छिव ।
तिलक्वाथेन संयुक्तं रक्तगुल्मं स्त्रिया हर ॥
कुसुमस्य निवृद्धञ्च तरुणीनां महेश्वर ।
रक्तोत्पलस्य वै कन्दं शर्करातिलसंयुतम् ॥
पीतं सशर्करं स्त्रीणां धारयेत् गर्भपातनम् ।
रक्तस्रावस्य नाशः स्यात् शीतोदकनिषेवणात् ॥
पीतन्तु काञ्जिकं रुद्र कथितं शरपुङ्खया ।
हिङ्गु सैन्धवसंयुक्तं शीघ्रं स्त्रीणां प्रसूतिकृत् ॥
मातुलुङ्गस्य वै मूलं कटिबद्धं प्रसूतिकृत् ।
अपामार्गस्य वै मूलं योनिस्थञ्च प्रसूतिकृत् ॥
अपामार्गस्य वै मूले गर्भवत्यास्तु नामतः ।
उत्पाट्यमाने सकले पुत्त्रः स्यादन्यथा सुता ॥
अपामार्गस्य वै मूले नारीणां शिरसि स्थिते ।
गर्भशूलं विनश्येत नात्र कार्य्या विचारणा ॥
कर्पूरमदनफलं मधुकैः पूरितः शिव ।
योनिः शुभः स्याद्वृद्धाया युवत्याः किं पुन-
र्हर ॥
माषस्य विदलान्येव वितुषाणि महेश्वर ।
घृतभावितशुष्काणि पयसा साधितानि वै ॥
समध्वाज्यपयोभिश्च भक्षयित्वा च कामयेत् ।
स्त्रीणां शतं महादेव तत्क्षणान्नात्र संशयः ॥
रसश्चैरण्डतैलेन गन्धकेन शुभो भवेत् ।
त्रिफलोदकसंघृष्टो वलक्षणाद्भवेत् ॥
दुग्धं वितुषमाषैश्च शिम्बीबीजैश्च साधितम् ।
अपामार्गस्य तैलेन पीतं स्त्रीशतकामकृत् ॥”
इति गारुडे १९६ अध्यायः ॥
(स्त्रीसम्भूतेः कारणं यथा,—
“स्त्रीरेतसोऽधिकत्वेन हीनशक्रेन्द्रियादपि ।
रजसोऽप्यधिकत्वेन स्त्रीसम्भूतिः प्रजायते ॥
समधातुबलेनापि प्रकृत्या विकृतेः समे ।
ऋतुव्यासरजःस्त्रीणां या या भवति भावना ॥
सात्त्विकी राजसी वापि तामसी वापि सत्तम ।
तादृशं जनयेद्बालं गुणैर्वा तादृशैरपि ॥”
इति हारीते शारीरस्थाने प्रथमेऽध्याये ॥
अक्षरच्छन्दोविशेषः । यथा, छन्दोमञ्जर्य्याम् ।
“गौ स्त्री । गोपस्त्रीभिः कृष्णो रेमे ॥”)